# श्री भैरवी कवचं (त्रैलोक्यविजयं)

## श्री भैरवी कवचं (त्रैलोक्यविजयं)

श्री देव्युवाच |
भैरव्याः सकला विद्याः श्रुताश्चाधिगता मया |
सांप्रतं श्रोतुमिच्छामि कवचं यत्पुरोदितं || 1 ||

त्रैलोक्यविजयं नाम शस्त्रास्त्रविनिवारणं |
त्वत्तः परतरो नाथ कः कृपां कर्तुमर्हति || 2 ||

ईश्वर उवाच |
शृणु पार्वति वक्ष्यामि सुंदरि प्राणवल्लभे |
त्रैलोक्यविजयं नाम शस्त्रास्त्रविनिवारकं || 3 ||

पठित्वा धारयित्वेदं त्रैलोक्यविजयी भवेत् |
जघान सकलांदैत्यान्यद्धृत्वा मधुसूदनः || 4 ||

ब्रह्मा सृष्टिं वितनुते यद्धृत्वाभीष्टदायकं |
धनाधिपः कुबेरोऽपि वासवस्त्रिदशेश्वरः || 5 ||

यस्य प्रसादादीशोऽहं त्रैलोक्यविजयी विभुः |
न देयं परशिष्येभ्योऽसाधकेभ्यः कदाचन || 6 ||

पुत्रेभ्यः किमथान्येभ्यो दद्याच्चेन्मृत्युमाप्नुयात् |
ऋषिस्तु कवचस्यास्य दक्षिणामूर्तिरेव च || 7 ||

विराट् छंदो जगद्धात्री देवता बालभैरवी |
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः || 8 ||

अधरो बिंदुमानाद्यः कामः शक्तिशशीयुतः |
भृगुर्मनुस्वरयुतः सर्गो बीजत्रयात्मकः || 9 ||

बालैषा मे शिरः पातु बिंदुनादयुतापि सा |
भालं पातु कुमारीशा सर्गहीना कुमारिका || 10 ||

दृशौ पातु च वाग्बीजं कर्णयुग्मं सदावतु |
कामबीजं सदा पातु घ्राणयुग्मं परावतु || 11 ||

सरस्वतीप्रदा बाला जिह्वां पातु शुचिप्रभा |
हसैं कंठं हसकलरीं स्कंधौ पातु हस्रौ भुजौ || 12 ||

पंचमी भैरवी पातु करौ हसैं सदावतु |
हृदयं हसकलीं वक्षः पातु हसौः स्तनौ मम || 13 ||

पातु सा भैरवी देवी चैतन्यरूपिणी मम |
हसैं पातु सदा पार्श्वयुग्मं हसकलरीं सदा || 14 ||

कुक्षिं पातु हसौर्मध्ये भैरवी भुवि दुर्लभा |
ऐं ईं ॐ वं मध्यदेशं बीजविद्या सदावतु || 15 ||

हसैं पृष्ठं सदा पातु नाभिं हसकलह्रीं सदा |
पातु हसौं करौ पातु षट्कूटा भैरवी मम || 16 ||

सहस्रैं सक्थिनी पातु सहसकलरीं सदावतु |
गुह्यदेशं हस्रौं पातु जानुनी भैरवी मम || 17 ||

संपत्प्रदा सदा पातु हैं जंघे हसक्लीं पदौ |
पातु हंसौः सर्वदेहं भैरवी सर्वदावतु || 18 ||

हसैं मामवतु प्राच्यां हरक्लीं पावकेऽवतु |
हसौं मे दक्षिणे पातु भैरवी चक्रसंस्थिता || 19 ||

ह्रीं क्लीं ल्वें मां सदा पातु निर्ऋत्यां चक्रभैरवी |
क्रीं क्रीं क्रीं पातु वायव्ये हूं हूं पातु सदोत्तरे || 20 ||

ह्रीं ह्रीं पातु सदैशान्ये दक्षिणे कालिकावतु |
ऊर्ध्वं प्रागुक्तबीजानि रक्षंतु मामधः स्थले || 21 ||

दिग्विदिक्षु स्वाहा पातु कालिका खड्गधारिणी |
ॐ ह्रीं स्त्रीं हूं फट् सा तारा सर्वत्र मां सदावतु || 22 ||

संग्रामे कानने दुर्गे तोये तरंगदुस्तरे |
खड्गकर्त्रिधरा सोग्रा सदा मां परिरक्षतु || 23 ||

इति ते कथितं देवि सारात्सारतरं महत् |
त्रैलोक्यविजयं नाम कवचं परमाद्भुतं || 24 ||

यः पठेत्प्रयतो भूत्वा पूजायाः फलमाप्नुयात् |
स्पर्धामूद्धूय भवने लक्ष्मीर्वाणी वसेत्ततः || 25 ||

यः शत्रुभीतो रणकातरो वा
भीतो वने वा सलिलालये वा |
वादे सभायां प्रतिवादिनो वा
रक्षःप्रकोपाद्ग्रहसकुलाद्वा || 26 ||

प्रचंडदंडाक्षमनाच्च भीतो
गुरोः प्रकोपादपि कृच्छ्रसाध्यात् |
अभ्यर्च्य देवीं प्रपठेत्त्रिसंध्यं
स स्यान्महेशप्रतिमो जयी च || 27 ||

त्रैलोक्यविजयं नाम कवचं मन्मुखोदितं |
विलिख्य भूर्जगुटिकां स्वर्णस्थां धारयेद्यदि || 28 ||

कंठे वा दक्षिणे बाहौ त्रैलोक्यविजयी भवेत् |
तद्गात्रं प्राप्य शस्त्राणि भवंति कुसुमानि च || 29 ||

लक्ष्मीः सरस्वती तस्य निवसेद्भवने मुखे |
एतत्कवचमज्ञात्वा यो जपेद्भैरवीं परां |
बालां वा प्रजपेद्विद्वांदरिद्रो मृत्युमाप्नुयात् || 30 ||

इति श्रीरुद्रयामले देवीश्वरसंवादे त्रैलोक्यविजयं नाम भैरवी कवचं समाप्तं |